# shrIchakrarAjavarNanam

# શ્રીચક્રરાજવર્ણનમ્

## Document Information

Text title : chakrarAjavarNanam

File name : chakrarAjavarNanam.itx

Category : devii, devI, panchadashI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2022

*sanskritdocuments.org*

# શ્રીચક્રરાજવર્ણનમ્

શ્રીગણેશાય નમઃ ॥

ૐ ક એ ઈ લ હ્રીં હ સ ક હ લ હ્રીં સ ક લ હ્રીં શ્રીં ।

અઙ્કાધિરૂઢયા શ્રીવલ્લભયાઽઽશ્લિષ્ટસુન્દરસ્વાઙ્ગમ્ ।
કુઙ્કુમપઙ્કિલદેહં શઙ્કરતનયં નમામિ વાક્સિદ્ધ્યૈ ॥ ૧॥

જય જય ચક્રાધીશ્વરિ જય જય લોકૈકપરજનનિ ।
જય જય નિગમાતીતે જય જય કામેશવામાક્ષિ ॥ ૨॥

કદા દેવિ સાઙ્ગાં મુદા પૂજયિત્વા હૃદિ બ્રહ્મમોદં ભજેયં કૃતાર્થી
ભવેયં ક્ષણાર્થી સદા લોકતન્ત્રે નિમગ્નસ્ત્વદર્ચાં વિધાનેન કર્તુમ્ ।
વિહીનઃ સ્વશક્ત્યા સ્તવેનાપિ રાજ્ઞીં સદા ભાવયામીતિ કૃત્વા હૃદબ્જે
પદાબ્જં ત્વદીયં સદા ભાવયિત્વા ધિયા પૂજયામિ ॥

પ્રકૃષ્ટે ત્રિરેખાધરાશ્રેણિપ્રસિદ્ધાભિરીડ્યાં ચ
માત્રૌઘસંસેવ્યમાનાં ચ
સઙ્ક્ષોભિણીમુખ્યમુદ્રાધિદેવીભિરારાધ્યમાનાં ત્રિલોકૈકમોહાખ્ય-
ચક્રાધિદેવીં ત્રિપૂર્વાં પુરાં લોકધાત્રીં પ્રકટાખ્યદેવીભિરારાધ્યમાનાં ચ
સઙ્ક્ષોભિણીમુદ્રયા રાજમાનાં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૩॥

એણાઙ્કચૂડાલદેવીં દ્વિતીયે ચ ચક્રે કલાબ્જેન યુક્તેઽભિવાઞ્છાપ્રપૂરે
કલાકામકર્ષાદિદેવીભિરર્ધેન્દુભાવાસ્વચ્છિરોભૂષણાભિઃ
પ્રવાલપ્રભાભિશ્ચતુર્બાહુસઙ્ક્રાન્તચાપાસિચર્મપ્રબાણાભિરામાભિ-
રેતાભિરીડ્યાં ચ ગુપ્તાભિધાનાભિરારક્તનેત્રાં પુરેશીં સદા
સર્વવિદ્રાવિણીમુદ્રિકાયુક્તહસ્તાં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૪॥

ઈશાધિદેવીં તૃતીયેઽષ્ટપદ્મે સ્વનામ્ના જગત્ક્ષોભણેઽસ્મિન્મનોજ્ઞે
ત્વનઙ્ગપ્રસૂનાદિદેવીભિરત્યુગ્રવિક્રાન્તિયુક્તાભિરીક્ષું ચ કોદણ્ડમસ્ત્રં ચ
પૌષ્પં તથા કન્દુકં ચોત્પલં ધારયન્તીભિરત્યન્તશોણાભિરત્યન્ત-

ગુપ્તાભિરાસેવ્યમાનાં ચ ચક્રાધિનાથાં મુદા સુન્દરીં પાણિપદ્મેન
ચાકર્ષિણીમુદ્રિકાઢ્યાં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૫॥

લક્ષ્યાં મહાયોગિવૃન્દૈસ્તુરીયે મહાચક્રમધ્યે તુ સૌભાગ્યદેઽસ્મિન્મનોજ્ઞે
જગત્સઙ્ખ્યકાસ્રે નિષણ્ણાં ચ સઙ્ક્ષોભિણીમુખ્યદેવીભિરત્યન્તતીવ્રાભિરારક્ત-
સિન્દૂરપઙ્કેન ભાસ્વલ્લલાટાભિરત્યુગ્રવહ્નિપ્રભાભિસ્તથા વહ્નિચાપં શરં
ચક્રખડ્ગૌ વહન્તીભિરારાધિતાં સમ્પ્રદાયાભિધાભિશ્ચ ચક્રેશ્વરીં વાસિનીં
પાણિપદ્મેન વશ્યઙ્કુરીમુદ્રિકાં ધારયન્તીં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૬॥

હ્રીઙ્કારરૂપાં મહેશીં ભવાનીં તથા પઞ્ચમેઽસ્મિન્દશારે બહિર્ભૂત-
ચક્રે મનોજ્ઞે સુનામ્ના હિ સર્વાર્થસાધે નિષણ્ણાં ચ સિદ્ધિપ્રદામુખ્ય-
દેવીભિરત્યચ્છદેહપ્રભાભિઃ કરાબ્જૈશ્ચતુર્ભિર્ગદાં પાશઘણ્ટામણિં
પરશું ધારયન્તીભિરેતાભિરુત્તીર્ણદેવીભિરારાધ્યમાનાં
ચક્રાધિનાથાં પુરાશ્રીસમાખ્યાં કરાબ્જેન ચોન્માદિનીમુદ્રિકાં
ધારયન્તીં સદાહં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૭॥

હર્યશ્વમુખ્યૈઃ સુરૈઃ પૂજિતાં તાં સુચક્રેઽપિ ષષ્ઠે તથાન્તર્દશારેઽત્ર
નામ્ના ચ રક્ષાકરેઽસ્મિન્મનોજ્ઞે ચ સર્વજ્ઞદેવીમુખાભિશ્ચતુર્બાહુ-
યુક્તાભિરત્યચ્છમુક્તાતિગૌરાભિરબ્જાતહસ્તૈશ્ચ વજ્રં ચ શક્તિં
તથા તોમરં ચક્રરાજં વહન્તીભિરેતાભિરીડ્યાં નિગર્ભાભિધાભિશ્ચ
ચક્રેશ્વરીં માલિનીં હસ્તપદ્મે મહામુદ્રિકાં વહન્તીં
નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૮॥

સર્વસ્ય લોકત્ય ચાધારભૂતાં તાં સપ્તમેઽસ્મિન્ ગજાસ્રે મનોજ્ઞે ચ
રોગપ્રણાશે વશિન્યાદિવાગ્દેવતાભિશ્ચ સંરક્તપુષ્પપ્રભાભિઃ
કરાબ્જૈઃ શરં ચાપવીણાં ચ પુસ્તં વહન્તીભિરત્યચ્છમુક્તા-
સરેણોલ્લસન્તીભિરેતાભિરીડ્યાં રહસ્યાભિધાભિશ્ચ
ચક્રેશ્વરીં સિદ્ધનાથાં કરાબ્જેન ખેચર્યભિખ્યાં સુમુદ્રાં વહન્તીં
નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૯॥

કલ્યાણશીલે વશિન્યાદિગેહાત્પરં ભ્રાજમાનાનિ દિવ્યાસ્ત્રવૃન્દાનિ
ચાપદ્વયં ચૌક્ષવં પૌષ્પમસ્ત્રં ચ પાશદ્વયં ચાઙ્કુશદ્વન્દ્વકં
લોકપિત્રોઃ સદાહં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૦॥

હરાઙ્કે વસન્તીં ત્રિકોણેઽષ્ટમેઽસ્મિન્ સુસિદ્ધિપ્રદે ચક્રરાજે
મનોજ્ઞે ચ કામેશ્વરીવજ્રનાથાભગેશીભિરબ્જાતહસ્તેષુ ચાપં

શરં પાનપાત્રં કૃપાણં તથા માતુલિઙ્ગં ચ ઘણ્ટામણિં કપાલં
વહન્તીભિરત્યન્તતુલ્યાભિરેતાભિરીડ્યાં પુરામ્બાં ચ ચક્રાધિનાથાં
સ્વહસ્તેન બીજાખ્યમુદ્રાં વહન્તીં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૧॥

લક્ષ્મીશવાગીશવન્દ્યે ત્રિકોણે ચ મિત્રેશનાથાદિનાથાન્ ગુરૂંશ્ચાપિ
દિવ્યૌઘસિદ્ધૌઘમર્ત્યૌઘવૃન્દં ચ સાલોક્યસારૂપ્યસાયુજ્યસિદ્ધિં
ગતં દેવિ ભક્ત્યા નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૨॥

હ્રીંબીજગમ્યે તતો દેવિ ધિષ્ણ્યે કલાસઙ્ખ્યકાસ્તાશ્ચ નિત્યસ્વરૂપાશ્ચ
કામેશ્વરીમુખ્યદેવીઃ સમાના નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૩॥

સત્યસ્વરૂપસ્ય બિન્દોઃ સમીપે સદા રક્ષણાર્થં ધૃતાસ્ત્રાઃ
સુવેષાઃ સદા જાગરૂકાઃ ષડઙ્ગાધિદેવીઃ સુલાવણ્યપૂર્ણા
નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૪॥

કલાનાથવક્ત્રાં જલાધારકેશીં ઝષદ્વન્દ્વનેત્રાં પિનાકાભચિલ્લીં
સિતાર્ધેન્દુફાલાં સુમાકારનાસાં સુબિમ્બોષ્ઠરમ્યાં કદમ્બદ્વિજાલિં
કનત્કમ્બુકણ્ઠીં લતાબાહુયુક્તાં કુલાગસ્તનદ્વન્દ્વસંશોભમાનાં
વલીશોભમાનાં વલગ્ને પરોક્ષાં સુરમ્ભોરુશોભત્રિકોણસ્ય મધ્યે
સદાનન્દપીઠે શિવાઙ્કે લસન્તીં ત્રિખણ્ડાખ્યમુદ્રાયુતાં ચક્રરાજ્ઞીં
મહાભૈરવીં તાં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૫॥

લસદ્રક્તસિન્દૂરવર્ણાં કરાબ્જૈઃ સુપાશં ચ કોદણ્ડમિક્ષુપ્રકાણ્ડં
સુમાસ્ત્રં તથા ચાઙ્કુશં ધારયન્તીં કૃપાપૂર્ણલાવણ્યનેત્રાન્તરમ્યાં
સુધાસ્યન્દિનિક્વાણવાગ્જન્મભૂમિં સુમાસ્ત્રસ્ય શાસ્ત્રાર્થસારૈકનાડીં
નતાનાં જનાનાં સમસ્તપ્રદાત્રીં નવાનાં પુરાણામધીશાં સુગાત્રીં
જગદ્રક્ષણે દક્ષબાહાલતાઢ્યાં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૬॥

હ્રીઙ્કારયુક્તેન મન્ત્રેણ નિત્યં ભવત્પાદુકાં યે સ્મરન્તિ સ્વબુદ્ધ્યા
ન તેષાં જરામૃત્યુદારિદ્ર્યપીડા ચ તેષાં હિ સન્દર્શમાત્રેણ સર્વાઃ
પ્રબાધાઃ પ્રણશ્યન્તિ સત્યં ત્રિસત્યં ચ સત્યં કૃતાર્થાશ્ચ તે
મુક્તિભાજો હિ યે વા મહારાજ્ઞિ ચિત્તામ્બુજે ત્વાં સદા ધારયન્તીહ
શ્રીચક્રસામ્રાજ્ઞિ ભક્ત્યા નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૭॥

શ્રીઙ્કારમન્ત્રાબ્જશ ૃઙ્ગારહંસીં નૃપોક્તિપ્રપઞ્ચાન્તસિદ્ધાન્તવલ્લીં
લસદ્ભૃઙ્ગનીલાલકશ્રેણિરમ્યાં સદા ભક્તિનમ્રેણ ચિત્તેન ગમ્યાં
હરાઙ્કે હરેર્વક્ષસિ બ્રહ્મવક્ત્રે ત્રિધારૂપસમ્પત્તિવિભ્રાજમાનાં

ચિદાનન્દવલ્લીં તુરીયાં પરેશીં જગત્સૃષ્ટિસંરક્ષણાકર્ષકર્ત્રીં
ગુણાતીતરૂપાં ગુણૈશ્ચાપિ યુક્તાં મહામન્ત્રરૂપાં મહાપીઠરૂપાં
મહાશક્તિરૂપાં મહાનન્દરૂપાં નમામિ સ્વમૂર્ધ્ના નમામિ સ્વમૂર્ધ્ના ॥ ૧૮॥

ઇતિ શ્રીચક્રરાજવર્ણનં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*shrIchakrarAjavarNanam*

pdf was typeset on December 27, 2022

Please send corrections to *sanskrit@cheerful.com*